ती महांति २ षकारांतश्शब्दः धनुष् सजुष् [illegible] वत्तुष् हवि ३८
ष् वपुष् प्रभृतयः आयुः आयुषी आयूंषि २ धनुः धनुषी धनूं

षि २ सकारांतः पयस् वर्चस् तेजस् वर्चस् प्रभृतयः पयः पयसी
पयांसि २ पयसा पयोभ्याम् पयोभिरित्यादि अदस्शब्दस्य स्यमोर्लु
कि कृते सोर्विसर्गः अदः द्विवचनादौ टेरत्वे कृते मत्वोत्वे मा२ अमू
नी अमूनि अदः अमी अमूनि पुनः अदः अमू अमूनि शेषं पुंव
त् एतदधिकृत्य नाम्निनः स्वरे इति नुः अमुना अमूभ्यामित्यादि इति
हलंतान्नपुंसकलिंगाः अथ वाच्यलिंगा युष्मदस्मदोः स्वरूपं निरूप्यते
तयोरवाच्यलिंगत्वात्रिष्वपि लिंगेषु समानं रूपम् त्वमहं सिना
सिमिति युष्मदस्मदोः त्वमहमित्यादेशौ भवतः औ युवा
वौ द्विवचने युष्मदस्मदोः द्विवचनपरयोः युव आव आदेशौ भवतः आ
मौ युष्मदस्मदोः परः औ आम भवति युवाम् आवाम् पदंवचनंस्मा

वाच्यमित्युच्यते भेद्यं त्रिलिंग्यं भजते तु यः ॥ विशेषणत्वमाप
न्नः वाच्यलिंगः स उच्यते

सा॰
३९
39

जसासहितयोः युष्मदस्मदोः यूयं वयं आदेशौ भवतः यूयं वयं त
न्मदावेकत्वे एकत्वे गम्यमाने युष्मदस्मदोः त्वत मत इत्येतावादे
शौ भवतः अंत्यो युष्मदस्मदोः टेरात्वं स्यात् अमि सकारे भिसि
भकारे च परे त्वां मां युवां आवां त्वदादेष्टेरत्वे कृते शसो सीति दीर्घः
शसो नो वक्तव्यः युष्मान् अस्मान् त्वन्मदादेशात्कृते एटाङ्योः
युष्मदस्मदोः टेरेत्वं भवति टाङि इत्येतयोः परयोः अयादेशः त्व
या मया युवाभ्यां आवाभ्याम् युष्माभिः अस्माभिः तुभ्यमह्यं
ङया ङयासहितयोः युष्मदस्मदोः तुभ्यं मह्यम् इत्येतावादे
शौ भवतः तुभ्यं मह्यं युवाभ्यां आवाभ्यां भ्यसोभ्यम् युष्मदस्म ३९
दोः परो भ्यस अभ्यं भवति एकारो भकाराद्विच्याहृतस्य ः नेना ५२

शैते न भवतः युष्मभ्यं अस्मभ्यं ङसिभ्यसोःस्तुः पञ्चम्याः ङसिभ्यसोः
स्तुर्भवति णकारः सर्वादेशार्थः उकार उच्चारणार्थः त्वत् मत् युवा
भ्यां आवाभ्यां युष्मत् अस्मत् तवममङसा ङसासहितयोः युष्म
दस्मदो तवमम इत्येतावादेशौ भवतः तव मम युवयोः आवयोः
सर्वादित्वात्सुट् युष्माकं अस्माकं सामाकम् युष्मदस्मदोः परः
सामाकं भवति त्वयि मयि युवयोः आवयोः युष्मासु अस्मासु
पदादीनां घेरभावः अथानयोरादेशविशेषविधिरुच्यते युष्म
दस्मदोः षष्ठीचतुर्थीद्वितीयाभिः तेमेवांनौवस्नसौ युष्मदस्मदोः
यथासंख्येनामी आदेशा भवंति कीदृशयोः षष्ठीचतुर्थीद्वितीया
सहितयोः तथैकवचने तेमे द्विवचने वांनौ बहुवचने वस्नसौ भव

सा॰
४॰
५०

मम

तः स्वामीतेससमायातः स्वामीमेसाम्प्रतंगतः नमस्तेभगवन्मेयोदेहि
मेमोक्षमव्ययम् स्वामीवांसनद्दासोसर्वैर्दृष्टोनौदानयाचनो राजावां
दास्यतैदानेहस्तानेनौभयघ्नसूदनः देवोवामवताद्विष्णुर्नरकोद्वेजनना
र्दनः स्वामीवोबलवान्नानोस्वामीनःसजनार्दनः नमोवोब्रह्मवि
द्भ्योत्तानेनोदीयतांधनं सानन्दान्वःप्रपश्यामिपश्यध्वंनःसुहृदः
विकान्वे त्वामामा प्रमासहितयोः युष्मदस्मदोः त्वामादेशोभवतः
पश्यामित्वामहालीढंपश्यमामदभेदकम् नादौ पदाद्येवर्तमान
योः युष्मदस्मदोः एतेआदेशानभवंति वत्समादयः सर्वोपानप
दाद्येनभवंतिवत्समादयः देवास्मान्पाहिनन्ददेवविस्मोस्मान्रक्षतुसर्वे
तः हरौविश्वेश्वरोदेवोयुष्माकंकुलदेवता सएवभगवानस्माभ ४॰

पर्यंतिमेत्वोजगमरज्य पश्यमोजगतांपतिं ४

स्माकं पापनाशनः नवयेसात्रवोराजन्ममतेप्यतिशात्रवः नवमित्रा
णियानिस्युर्नममभित्राणितान्यपि पादादाविति किं पांतुनोनरसिं
हस्यनखलांगलकोटयः हिरण्यकशपोर्वक्षः ततास्रक्कर्दमारुणाः
चादिभिश्च चादिभिरपियोगेनेन्नते आदेशा भवंति पुत्रो युष्माकम
स्माकंच चादिर्निपातः च वाहा अह एवं ननं पृथक् विना नाना
स्वस्ति दोषा नक्तं मृषा मिथ्या मिथस् अस्ति नास्ति अथ अथो
प्रायस् स्वयम् नीचैस् उच्चैस् स्वर् अंतर् प्रातर् पुनर् भूयस् अहो
स्वित् उत सह नाम ऋते अंतरेण अंतरा नमस् पुरस् अलं
कृते अ मा नो ना प्रतिषेधे ईषत् किल खलु वै शनैस् दूरात्
मृषो साकं सार्धं यत् तत् स्वराद्येवमादिगणो निपातसंज्ञो भ

सा॰
५८।
५८

वतितत्रादिविभक्त्यर्थे निपात्यते तस्मिन्निति तत्र यस्मिन्निति यत्र कस्मि
न् कुत्र तस्मिन्काले तदा यस्मिन्काले यदा अन्यस्मिन्काले अन्यदा
एकस्मिन्काले एकदा सर्वस्मिन्काले सर्वदा तेन प्रकारेण तथा येन
प्रकारेण यथा केन प्रकारेण कथं अनेन प्रकारेण इत्थं तस्मादि
ति ततः यस्मात् यतः कस्मात् कुतः अस्मात् अतः सर्वस्मात् सर्वतः सर्व
विभक्तिकस्तसिरेके पूर्वस्मिन्निति पुरस्तात् अधस्तात् परस्मात् एक
स्मादिति एकतः परस्मिन् परेण परस्तात् आदिग्रहणे हेत्वर्थे वाच्ये आदि
प्रत्ययो भवति इति एषां हि वक्तेति चण्डालाः किमः सामान्ये चिदादिः
कश्चित् कश्चन क्वचित् कश्चन क्वचित् क्वचन तद्योगेन कार्त्स्न्ये वा ५८।
सात् राजसात् भस्मसात् सर्वधीने घने मद्रसात् ऊर्ध्वयाङ्कीका

रोले ऊरीकृत्य उररीकृत्य सद्यादि अद्यादिकालेनिपात्यते सद्यः
सपदि अधुना इदानीं साम्प्रते तूर्णं शीघ्रं आशु सम्प्रति पूर्वे
द्युः अन्येद्युः अपरेद्युः यदि यर्हि तर्हि कदिति अले प्रादिरुपस
र्गः प्रपरा अपसं अनु अवनिर् दुर् वि आङ्नि अधि अपि अ
तिसु अभि प्रति परिउपप्रा स्वत अंतर आविः अयं गणः उपसर्गसं
ज्ञो भवति प्राग्धातोरुपसर्गाः उपसर्गाः धातोः प्राक् प्रयोक्तव्याः न
द्रव्यं तथा विशेषरूपमव्ययं स्यात् कार्यंतेच कामयन्तेचाव्य
यसंज्ञं भवति क्त्वा क्तेत्वा गत्वा ल्यप् तुम् णम् डाच् वत् आम्
कृत्वस् धाम् इति कादयः अव्ययाद्विभक्तेर्लुक् भवति नपाद्
निर्देशो अव्ययानांवचनलिङ्गादिनियमः उच्चैः प्रहृषः उच्चैः स्थौ ३

सा॰
५४
५८

ष्वः कुले उक्तं च सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु वचनेषु
च सर्वेषु यन्न व्येति तदव्ययम् उक्तान्यलिङ्गान्यव्ययानि अधुना
लिङ्गविशेषविधिविज्ञानाय स्त्रीप्रत्ययाः प्रस्तूयन्ते आबन्तः
स्त्रियाम् आकारान्तान्नाम्नः स्त्रियां वर्तमानादाप्प्रत्ययो भवति जा
या माया मेधा श्रद्धा धारा इत्यादि अनादेश्चापवक्तव्यः अजा ए
डका कोकिला अश्वा बाला गणिका काप्यतः कापि अतः स्त्रि
यां कापि परे पूर्वस्याकारस्येकारादेशो भवति कारिका पाचिका
पाठिका वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव हलन्
तानां यथा वाचा निशा दिशा अवगाहं वगाहं अपिधानं पिधानं ह्र ५४
स्वो वा स्त्रियां कापि परे तरादौ च पूर्वस्य ह्रस्वो वा भवति वेणिका वे

णीका नदिका नदीका श्रेयसितरा श्रेयसीतरा नौकादेशादेवो
नभवति वाग्रहणादित्यं विवक्षा निपातेन निपतं मनेके सर्वेषिस्थिति
निपातनाममनेकार्थत्वात् इकंच धातवश्चोपसर्गाश्च निपाताश्चे
तितेत्रयः अनेकार्थाहिविज्ञेयापाठेस्तेषांनिदर्शनं नणीष नका
रांतात् ऋदंतात् अंतातात् स्त्रियामीष्प्रत्ययोभवति दण्डिनी द
न्तिनी करिणी हस्तिनी मालिनी ईषिपरेलोलोपो वक्तव्यः राज्ञी
शुनी कर्त्री ओपगावी ऋकारांतान्नान्तस्त्रस्यादेशेनभवतिपथ्यले
पः रस्य अस्यय: तस्यलोपोभवति स्वरेयकारेपरे ओपगावीस्थितः
षकारटकारउकारऋकमानुबन्धाच्च स्त्रियाम् ईश्स्यात् ष कारकौ
टकुरुचरी ओपमनी चरपञ्चनी भवंती पठंती इत्यादि नदाट

सा॰ ४१ 43

नदादेर्गणात् स्त्रियामीप् स्यात् नदी गौरी गौतमी चतुर्थी पञ्चमी ॥ इं-
द्रादेर्गणात् स्त्रियामानीप् प्रत्ययः स्यात् इंद्राणी भवानी रुद्राणी
ब्रह्माणी मृडानी वरुणानी सर्वाणी मातुलादेर्वा मातुलोपाध्या-
यक्षत्रियाचार्येभ्य आनीप् प्रत्ययो भवति मातुलानी मातुली उ-
पाध्यायानी उपाध्यायी क्षत्रियाणी क्षत्रिया आचार्यानी आचार्या
ईप समसमाहारे गणाच्च त्रयाणां समाहारः त्रयी हयीं पुंयोगेन च शूद्री
गणकी चकाराद्गोपालिकादीन् जातेरयोपधात् जातिवाचिनो
यकारोपधाददकारान्तात् स्त्रियामीप् प्रत्ययः स्यात् मेषी सूकरी
हंसी कुक्कुटी ब्राह्मणी अयकारोपधात् किम् क्षत्रिया वैश्या प्र ४
थमवयसः वाचिनोऽदन्तादीप् वक्तव्यः कुमारी किशोरी कलभी

इत्यादि प्रथमवयस्थाकिम् वृद्धा स्थविरा अवस्थात्किम् शि
शुः कन्यायानेष्टः कन्या शुल्काहा दीर्घपुच्छी दीर्घपुच्छा स्वाङ्गा
द्वा स्वाङ्गवाचिनः स्त्रियां वा ईप् स्यात् सुमुखी सुमुखा सुस्तनी
सुस्तना तन्वङ्गी तन्वङ्गा स्वगात्रीतिनिरन्तं पञ्चवदनस्यादेवा
अवस्थात्वभवति अद्रवं मूर्त्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् अ
तत्स्थं तत्र दृष्टं च तेन चेत्तत्तथायुतम् स्त्रीप्रकारादंकेशीप्रवावक्र
मः अङ्गुली अङ्गुलि धूली: धूलि: श्रोणिः श्रोणी अमेरितिमिवि
शेषणानि कृतिः भृतिः धृतिः मति पञ्चम्यादेः मन्वादेर्गणा
न स्त्रियामी प्रस्यात् ऐकारादेशश्च मनायी वृषाकपायी अग्नायी
चकारान्नकोरोवा मनावी पत्यादयः पत्न्यादयोनिपात्यन्ते प

अद्रवं इत्यस्योदाहरणं सुस्वेदबिन्दुवतात् सुस्तनाना अमूर्त्तत्वात् सुमुखो शाला अप्राणिस्थत्वात् सुशोफा
विकारजत्वात् सुकेशी सुकेशा वा ... सुस्तनी सुस्तना वा प्रतिमा

...पाणिवत्... [illegible]

त्वौ अंतर्वत्नी सखी अशिश्वी अर्धजरती युवती प्राची प्रतीची इ
सा त्यादयः दारशब्दो नित्यं पुंलिङ्गो बहुवचनांतः दाराः दारान् दारैरि
५० त्यादि वोतोगुणात् उकारांतात् गुणवाचिनः स्त्रियां वा ई स्यात् पट्वी
55 पटुः मृद्वी मृदुः तन्वी तनुः करन्वी करनुः उतऊङ् उकारांतात् ऊ
प्रत्ययः स्यात् पङ्गुः वामोरूः यूनस्तिः युवन् शब्दात् तिप्रत्ययः स्या
त् युवतिः पश्चान्नामसन्वान्यादयः आवेनाद्याप इति से लोपः ई वृना
द्वै सप इति से लोपः सर्ववन्याक्रियाः अथ विभक्त्यर्था निरूप्यंते लि
ङ्गार्थे प्रथमा धातुप्रत्ययाद्यतिरिक्तमर्थवच्छब्दरूपं लिङ्गं तस्यैव स
त्तामात्रे प्रथमा विभक्तिः स्यात् लिङ्गादयः प्रथमार्था इति केचित् ७७
तत्सहस्रं आदिशब्देन लिङ्गपरिमाणवचनानि ग्राह्याणि यथा लि

ॐ कुल: श्रीकुल: त्वां परिमाणे त्वारी हेलाः आठकम वच
ने एकः द्वौ वदव: रविरिवराजते राजा रोषकान्कुमारी रोरूपते वो
भजन्ते भुवं भूपालाः प्रागारलोरामलत्वाये संति संतः कियंतः कु
मारा: पोरने स्वैरं रोरूयंते चत्वारकाः नेगीयंते च गोनत्वामेस्मियंते
रुन्नार्दिताः घटकारकभेदश्रून्यं वस्तु सन्मात्रं आमेघोणव आमेत्र
णेभिमत्वोकरणैश्च प्रथमाविभक्तिर्भवति मांसमुहूर्गोविंदम
सीदपरमेश्वर कुमारीस्वैरमासायां त्वमधुंभोतनपस्विनः भोत्
भगोत्व आगोत्व एनेशास्त्रात्रिविषयेनिपात्यते त्वमत्वभो: द्वारा
ध्यभगोत्वभंगनमोनमः अथोत्र भोमदासा त्वघातयात्वोत्वरोस
रन रोषाः कार्यकर्तृसाधनयोरान्यपात्रेविस्रोषावयोस्तंबधेश्राधा

सा॰
४५
45

रमावयोः शेषाद्द्वितीयायाश्चविभक्तयोपनेष्वर्थेष्वपि कार्यकर्मका
रके उक्ताह्य प्राप्ये संस्कार्ये विकार्ये च द्वितीयाविभक्तिः स्यात् क
टंकरोति काष्ठंकोऽश्वंपश्यति चाहदृष्टः गान्दोग्धिपयः धर्मंब्रूते सोम
सुनोति सोमंपाः अभिसर्वतसाकार्या निगपर्यादिषु त्रिषु द्वि
तीयाभिद्वितान्ते अयते तोन्यत्रापि दृश्यते द्वितिरुक्तं ग्रामंस्थितमभि
ग्राममभितो नदी वहति सर्वतो नगरं तरवो दृश्यन्ते धिग्देवदत्तं पा
पिष्ठं उपर्युपरि ग्रामं हितं पापं अधोऽधो ग्रामं निधानं अध्यधि ग्रामं कः पतति
निकषा ग्रामं कालाध्वनोरत्यन्तसंयोगे मासमधीते क्रोशं पर्वतः नैरं
तर्ये किम् मासस्य द्विरधीते कर्तरि प्रयोगे क्रियायाः प्रधानसाधनेऽपि क्रि
यासिद्ध्युपकारके करणे तृतीयाविभक्तिः स्यात् भित्त्वा शरेण रामे ४५

णरावणो लोकरावणः करोत्यर्णविद्योर्णोपिकाने द्वैधुभ्यते भुक्त द
नपात्रे सम्प्रदाने कारके चतुर्थी वेदविदे गां ददाति छात्राय कन्यां
ददाति सम्यक् श्रेयोबुद्ध्या प्रदीयते यस्मै तत्सम्प्रदानं विश्लेषावधौ प
ञ्चमी विश्लेषावधौ पञ्चमी विश्लेषो विभागः तत्र योऽवधिः चलन्
वा चलन्वा विवक्षितः तत्रापादाने पञ्चमी धावतोऽश्वात्पतितः
भूमेस्तोवरतिगङ्गा संबन्धे षष्ठी राज्ञः स्वपुरुषोऽस्त्येयः पितुर्वेतन मश
६८ ज्ञने गंगायां वचनं धर्मकवीनां सम्बद्ध च साधारेण सप्तमी आधा
रेऽधिकरणे षड्विधमधिकरणं औपश्लेषिकं सामीपकं अभिव्या
पकं वैषयिकं नैमित्तिकं औपचारिकं औपश्लेषिकं यथा कटे शे
ते कुमारो सौ वटे गावः सुवते अभिव्यापकं तिलेषु विद्यते तैलं वै

षष्ठिकं हृदि ब्रह्मामृतं परं नैमित्तिकं गुह्यं मनःहुतं धीरो ॐ पञ्चाशिकं
सा अङ्गुल्याग्रे करिणां शान्ते भावः क्रियाललाटेन ऋतममसो यत्र क्रियया क्रि
५५ यां तत्र लक्ष्यते सभावः वर्षति देवं चोरग्रामान्तः पतनं ग्रामांल्लिनि पति
W6 तो रतिः विनासहनममनेननि धीरोऽन्वाम्यादि मिश्र पतेरपि योग
यथा सद्देशेन द्वितीयायाः सुः विना पापं सर्वं फलति अन्तरेणाति
ली किं जीवितेन अन्तरान्नामोसाधु रिमादि आदि पदाग्रायं स
हस्रदृशा संकं सार्धं स्मादियोगान् स्तीया सहशिरःखलेनतोगरुः
सहस्राक्षेत्रो मैत्रेण सार्कं नयना भ्यां स्नस्नः दन्ताः सार्धं पति मिश्रं तं
साधु नमः स्वस्ति स्वाहा स्वधालं वषड्योगे चतुर्थी नमो नारायणाय ५६
णाय स्वस्त्यस्तु राज्ञे सोमाय स्वाहा पितृभ्यः स्वधा अलं मल्लोम

लाय इंद्राय वषट् अन्यादियोगे पञ्चमी ऋते ज्ञानान्न मुक्तिः ग्रन्य
ग्रहाद्विहारः निर्धारणे षष्ठी निर्धारणं क्रियागुणजातिभिः समुदाया
त्पृथक्करणम् तत्र षष्ठी सप्तमी च क्रियापराणां मध्ये भगवदाराधकः
श्रेष्ठः गवां कृष्णा संपन्नक्षीरा एतेषां क्षत्रियः शूरतमः स्वाम्यादियो
गे षष्ठी सप्तमी च गवां स्वामी गोषु स्वामी गवामधिपतिः गोष्वधिप
तिः कर्तृकर्मणोः कृति षष्ठी कर्तरि कर्मणि च षष्ठी स्यात् क्ता
दिवर्जिते कृदन्ते शब्दे प्रयुज्यमाने व्यासस्य कृतिः भारतस्य श्रवणं
स्मृतेश्च कर्मणि स्मृत्यर्थे धातौ प्रयुज्यमाने कर्मणि षष्ठी भवति मा
तुः स्मरति च शब्दान्निर्देशाद्द्वितीया च मातरं स्मरति हेतौ तृतीया
पञ्चम्यौ वक्तव्ये शब्दोऽनित्यः कृतकत्वेन कृतकत्वाद्वा भयाद्

नोच चौराद्बिभेति व्याघ्राद्रक्षति षष्ठी हेतुप्रयोगे कस्य हेतोरियं कन्या
सा॰ इत्थंभावे तृतीया अन्यस्मात्केनप्रकारेण वर्तमानः स इत्थंभावः न
४॰ सिद्धित्थंभावे तृतीयास्मात् शिष्यं पुत्रेण पश्यति संसारमसारेण पे पश्यति २
47 नाङ्गविकारः येन विकृतेनाङ्गेन अङ्गिनो विकारो लक्ष्यते तस्माद्
ङ्गात्तृतीयास्यात् अक्ष्णा काणः पादेन खञ्जः शिरसा खल्वतिः
जनिकर्तुः प्रकृतिः जायमानस्य कार्यस्योपादानमपादानसंज्ञं भ
वति तत्रापादाने पञ्चमी यस्मात्प्रजाः प्रजायन्ते तेन तुष्येति विदोवि
दुः आङ्दिग्योगे च आ पाटलिपुत्राद्वृष्टो देवः पाटलिपुत्रं नाम न
गरं वर्जयित्वा आदिशब्दात् अपपरि पतेर्योगेपि अपकान्यकु ४॰
ब्जाद्वृष्टो देवः परिकान्यकुब्जाद्वृष्टो देवः तादर्थ्ये चतुर्थी वाच्या संयमा

यत्कृतं येन नरो यस्माद्यस्मैतद्यस्मं यस्मै मोहाय मेधावी यन्न दाताय भुक्त
ये क्रुध्यादियोगे वर्तते क्रुध्यति कुप्यते विप्राय द्रुह्यते मित्राय कुप्यते
गुणवर्तिस्यते लोपेन चतुर्थी वक्तव्या स्वधा नमस्ते स्वधा मातृभ्यः
प्रेतेभ्यः स्वधा निमित्तात्कर्मयोगे सप्तमी वक्तव्या चर्मणि द्वीपिनं ह
न्ति दन्तयोर्हन्ति कुञ्जरं केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः वि
षये च तत्कैवल्यतः षष्ठीसप्तम्यौ वा नारदे बहूनां क्रोशानां मात्रः
वैरः बहुषु साधुषु वा रयत्न सत्सु यमलार्थी यात्य साधुमार्गेण
मातापित्रोर्हृदतोः प्रव्रजति पुत्रः प्रत्येते प्रथमा यदिदं कार्यं त्वा
यन्येनाख्यातेन नक्षत्राणां वाक्यं भवति तदा प्रथमा प्रयोक्तव्या घटः
क्रियते पटः कार्यः कटः कृतः हनन्दस्मिस्यादिः सर्वत्र दृश्यान्तरो

सा०
५८
58
ति दधिजन्तुकृणादिमथः भूनातुंस्थानात्स्थितिः व्रजतीविरञ्चः कर्ता
कर्माच करणंसंप्रदानंचतुर्थकं अपादानंतथाधारः कारकाः
षट्प्रकीर्तिताः ॥ इतिकारकप्रक्रिया ॥ अथसमासप्रक्रियारभ्यते
अथार्थवद्विभक्तिविशिष्टानांपदानांसमासोनिरूप्यते विभज्यते
कर्तृकर्मादयोययासाविभक्तिः समासश्चान्वयेनाम्नां नाम्नाम
न्वययोगेत्वेसत्येवसमासोभवति यथाज्ञानदृष्टितेपि नहिनसमा
सयोर्विभक्तिसहितयोर्नाम्नोःत्व ततोभार्यापुरुषस्यैतस्मादेनभव
ति परस्परसंबंधाभावात् सचसमासःषड्विधः द्विगुस्तत्पुरुषो
द्वन्द्वः कर्मधारयएवच बहुव्रीह्यव्ययीभावः समासाःषट्प्रकी
र्तिताः पूर्वपदप्रधानोऽव्ययीभावः परपदप्रधानौद्विगुतत्पुरुषौ ५८

उभयपदप्रधानो कर्मधारयो द्वंद्वो अन्यपदप्रधानो बहुव्रीहिः स
त्क्रियासंनिधानादुभयपदप्रधानो बलवान् ऐकपद्यमैकस्वर्य
मेकविभक्तिकत्वं च समासप्रयोजनं स्त्री अधि इति स्थिते स्त्रीशब्दा
द्वितीयैकवचने अम् स्त्रियमधिकृत्येति विग्रहे अन्वयोगार्थसमर्थ
कः पदसमुदायो विग्रहो वाक्यमिति यावत्तेन समासेऽव्ययस्य पूर्व
निपातो वक्तव्यः पूर्वं वाच्योऽव्ययीभावः अव्यये पूर्वपदे सति योऽन्वयः
सोऽव्ययीभावसंज्ञकः स्यात् समाससंज्ञायां समासप्रत्यययोः समा
सेवर्तमानायाः विभक्तेः प्रत्यये च परे लुक् स्यात् [illegible]स्य लुकोऽलुक
निमित्ताभावे नैमित्तिकस्याप्यभावः कृत्तद्धितसमासैनामत्व नाम
संज्ञायां स्यादिविभक्तिः अधिस्त्री सि इति स्थिते स नपुंसकं सोऽव्ययी

सा.
४९

49

भावो नपुंसकलिङ्गः स्यात् नपुंसकाद्ध्रस्वत्वं अव्ययीभावात् अ
व्ययीभावात्परस्याविभक्तेः लुक्भवति अधिस्त्रिरद्दकार्यं प्रवर्त
ति क्रांतमतिरिकुले नावमतिक्रांत अतिनु जलं इत्यादयोसं
प्यहरणानिकारोवकक्यो पदार्थसादृश्येवर्तमानः समस्यते सो
व्ययीभावसंज्ञकः समासः स्यात् शक्तिमनतिक्रम्यकरोतीति य
थाशक्तिः अतोमन्तः अकारांतादव्ययीभावात्परस्याविभक्तेरम्
स्यात् अन्तपञ्चम्यन्तवर्जयित्वा कुम्भस्यसमीपे उपकुंभंवर्तते
उपकुम्भंपश्य वाटाङ्योः टाङि. इत्येतयोः अम् वास्यात् उपकुम्भं
कृतं उपकुम्भेनकृतं उपकुम्भंस्थापय उपकुम्भेस्थापय अन्तेत इ ४९
तिविशेषणात् पञ्चमीनभवति उपकुम्भादानय अवधारणा

र्थे यावदिति अवधारणार्थे यावदव्ययं सुप्समस्यमानेऽव्ययीभावसंज्ञकः समा
सो भवति यावन्त्यमत्राणि संभवन्ति तावतो ब्राह्मणानामन्त्रयस्वेति या
वदमत्रमामन्त्रयस्व मक्षिकाणामभावो निर्मक्षिकं वर्त्तते पारे मध्ये ष
ष्ठ्या वा गङ्गायाः पारे पारेगङ्गं गङ्गाया मध्ये मध्येगङ्गं अथ तत्पु
रुषः द्वितीयायां तेभ्यपदे सति योऽन्वयस्तत्तत्पुरुषसमासः स्यात् ग्रामं
गतः ग्रामगतः दात्रेण छिन्नः दात्रछिन्नः यूपाय दारु यूपदारु वृ
केभ्यो भयं वृकभयं राज्ञः पुरुषः राजपुरुषः अक्षेषु शौण्डः अक्ष
शौण्डः कश्चिदप्यन्तस्य चतुरत्वं अग्नौ आहितः आहिताग्निः पू
र्वं भूतः भूतपूर्वः समासे कचिदेकपदत्वेन हेतुः पापानां वर्ज्जं
पापवर्ज्जं आत्मनाम्नां वर्ज्जं आत्मवर्ज्जं कौशिनयनानि यस्य सत्रिनय

नः पानस्यवा पान[illegible]शाह्वसनकास्यएकारोवा भवति स्वरायाः
सा पाने स्तनपाने नक्षि नञि पूर्वपदे स्तितेपोन्नपः सननसहषः स्यात
५ ना समासे सति नञ अकारादेशः स्यात नाकादिवर्जं नञाम्बणः अञ
50 स्वणः नविद्यते अकं दुःखं यत्रस नाकः नखेन कुलन धुंनक नक्ष
त्रमित्यादौ न भवति अनत्वैकस्मा मोनेति ननः अनादेशो भवति स्वरे
परे अश्वादन्यः अनश्वः धर्मविरुद्धः अधर्मः अब्राह्मणभावः अब्राह्म
णमिति त्वदन्न नहि रुद्धतदभावेषु नञवर्तते चार्थे द्वन्द्वः समुच्चया
न्वाचयेतरेतरयोग समाहाराश्चार्थाः तत्रेश्वरं च भजस्वेति प्रत्येक गुरु
मेक क्रियापदसंबंधे समुच्चये समासो नास्ति वटो भिक्षामट गां ५
चानयेति क्रमेण क्रियापदद्वयसंबंधाभावात इतरेतरयोग समा
धे न्वाचये समासो नास्ति पस्यर १

द्वारेवार्थे द्वन्द्वसमासः स्यात् इतरेतरस्त्वयं यथानेकारौकारान्तानां पूर्व
निपातो वक्तव्यः पटुश्च गमश्च पटुगमौ समासप्रत्ययपरतः कार्यो
नामप्रयोगः अग्निश्च मारुतश्च अग्निमारुतौ भोक्ता च भोग्यश्च भो
क्तभोग्येणा स्त्रीपुरुषौ पदश्चत्वादिरस्यलोपश्च द्वादिशे देवताद्वन्द्वे च दे
वताद्वन्द्वे पूर्वपदस्यादीर्घो वा वक्तव्यः अग्न्यादिसोमादीनां षत्वं वक्तव्यं
अग्नीषोमौ अग्निषोमौ इन्द्राबृहस्पती इत्येतेन योगे द्विवचनं बहुव
चनं च एकवद्भावः समाहारे वा वक्तव्यः शशश्च कुशश्च पलाशश्च
शशकुशपलाशाः शशकुशपलाशं मन्वादीनां विभक्तिलोपे
पूर्वस्य समासान्तः स्यात् अन्यस्य अन्योन्यम् परस्परं एकत्वे द्विगु
द्वन्द्वौ एकत्ववर्तमानौ द्विगुद्वन्द्वौ नपुंसकलिङ्गौ स्तः सर्वस्याप्र

सा॰ ५१
51

वै द्विगः सांख्याः पूर्वः समासः द्विगुर्निगद्यते समाहारैकत्वेष अका
रांताद्विगोः समाहारे ईप् स्यात् अस्य लोपः दशानां ग्रामाणां स
माहारः दशग्रामी पंचपञ्चमूली पञ्चाहीनामीप् प्रतिषेधो वक्तव्यः
पंचपात्रं त्रिभुवनं चतुष्टयं पंचखट्वपः समाहृतः पंचाग्नि प
ञ्चानां गवां समाहारः पंचगुः नंजसमकाहूलनं त्रिफले निवृहितः
इति द्विगुः बहुव्रीहिर्नाम्यपदप्रधानो यः समासः स बहुव्रीहि
संज्ञो भवति बहुधनं यस्य सः बहुधनः श्रष्टिधनं यस्य सो ष्टिधनः
यस्य प्रधानैरेकदेशो विशेष्यमाणतया प्रतीयते स तद्गुणसंज्ञको
बहुव्रीहिः लंबौ कर्णौ यस्य स लंबकर्णः एकोनकालो यस्य सः क ५।
एककालः भालेलोचनः बहुव्रीहिः बहुव्रीहिविशेषणस्य समस्य

तस्य पूर्वनिपातो वक्तव्यः चक्रपाण्यादौ न पाणौ चक्रं यस्य स चक्रपा
णिः इन्द्रादिभ्यश्च इन्द्रादिभ्यश्च पूर्वस्य सप्तम्यन्तस्य पूर्वनिपातो
न वक्तव्यः इंदुशेखरः कण्ठेभुजः पद्मनाभः भुवनेकीर्तिर्यस्य स
भुवनकीर्तिः चंद्रशेखर इत्यादिनेयं प्रजामेधयोरसिच् सुप्रजा
यस्य स सुप्रजाः दुष्टा मेधा यस्य स दुर्मेधाः धर्मादन् सुद्धधर्मा स पस्यद
सुधर्मा प्रमाणे स्त्रीलिङ्गस्यान्तार्थे वर्तमानस्य ह्रस्वो भवति स्वरूप
वती भार्या यस्य स स्वरूपवद्भार्यः पुंवद्वा समानाधिकरणे समासे स
ति पूर्वस्य स्त्रीलिङ्गस्य पुंवद्भावो भवति पुंवद्भावादीपो निवृत्तिः वा
ग्रहणं कल्याणीप्रिय इत्यादौ न भवति गोः गोरा ह्रस्वः समासान्त्यार्थे वर्त
मानस्य ह्रस्वः स्यात् पंचगावो यस्य सः पंचगुः सप्तग्रामस्य भाग्ना

स ५२
52

दिग्वर्गस्य पादस्याहस्त्या लोपो वक्तव्यः सहस्रं पादा यस्यासौ सहस्रपात्
शोभनौ पादौ यस्य स सुपात् व्याघ्रस्येव पादौ यस्य स व्याघ्रपात् नदी
स्यादेः हस्त्यादेः परस्य पादशब्दस्याकारस्य लोपो नास्ति हस्तिपादः
शमादौ स्वरे परे पदादेशोऽप्युवक्तव्या द्विपदः द्विपदा द्विपदे इत्यादि
टाङ्काः समासे सति इत्याद्ध क एते प्रत्ययाः स्युः यथाप्रयोगमनु
संधेयं टकारस्तत्सरूपे तेयोकारो हेहएवच ककारस्तु बहुव्रीहौ
इकारः सर्वतोमतः अविंतोमहिमायस्य अविंतमहिमः नो
वा नान्तस्य पदस्य टेर्लोपो वा भवति यकारे स्वरे च परे वा यद्व
णात् कश्चिन्न भवति उपधालोपश्च अहोमयम् सण्यादः क ५२
वीनां राज्ञा कविराजः टकारो नु व पर वर्ण्यः कविराज्ञी राज्ञ पु

रे राजपुरं वाक्चमनश्च वाग्मनसे इतिगणस्याहिशिंपद्याः इतिग
णपठः अहश्चरात्रिश्चअहोरात्रं हैवनपश्चाहिद्वाः वदवःकर्मोधा
पस्मसः बहुकर्तृकः प्रासादः बहवोराजानोयस्मिन्नगर्यांसाब
हुराजन्यनगरी स्त्र्यंतेलोपेकृते प्रावृत्तःस्त्रियाम् इतिबहुव्रीहिः क
र्मधारयतत्पुरुषेपदद्वयेतत्पुरुषेएकार्थे निष्टे सति समासःकर्म
धारयसंज्ञोभवति नीलंचतदुत्पलं नीलोत्पलं रक्तश्चासौलताचरक्त
लता उभौच्यासौकोकिलः पुंस्कोकिलः पुंसःखपसंयोगांतस्य।
लोपोवक्तव्यः नान्तस्यकृतात्समासः प्रादेरुपसर्गस्यनाम्नस्स
हार्थेनसहसमासस्तत्पुरुषोभवति सचाप्रागतत्वाभावेपित
त्पुरुषसंज्ञकः प्रकृष्टोवादःप्रवादः कुम्भंकरोतिकुम्भकारः

का॰ ५३ 53

सहादेः साद्रिः समासे सति सहादीनां साद्रिर्भवति अञ्चतौ गते महागतः
सध्र्यङ् कश्चित् यथा सहचरः सहसमन्तिरसां सध्रिसमितिरयः
सह् सम् तिरस् इत्येतेषां सध्रि समि तिरि इत्येते आदेशाः स्युः स
हाञ्चतीति सध्र्यङ् समञ्चतीति सम्यङ् तिरोऽञ्चतीति तिर्यङ् केः
कत् कुप्राकृत्यस्य तत्पुरुषसमासे स्वरे परे कद्भवति कुत्सितोऽश्वः क
दश्वं ईषदर्थे च ताद्धिः कुप्राकृत्यस्य ईषदर्थे च तुमान्नेषु कत् का कव
इत्येते आदेशाः भवन्ति कदुष्णं कोष्णं कवोष्णं लवणोऽका का
लवणं पुरुषे वा कुपुरुषः कापुरुषः पथ्यक्षयोश्च पथ्यक्षे
सति इत्यस्य उत्वं च भवति पथ्यं चक्षो इष्ट पथ्यं प्रकारान्तरं समस्य ५१
बोध्य सङ्ख्याया प्रकारे धाकृत्यावान धाप्रत्यये परतः कोऽन

ईनस्य देवषस्य अन्नम् नवर्गास्यसः बृहतोपतिः बृहस्पतिः
महेश्वरः महतश्चेरकारः समानाधिकरणेद्यावाधावाभूमी द्या
वाभूमी द्यावापृथिव्यौ जायापतिश्चदम्पती महती माया
महामायाइत्यादि आकृतिगणोयं लक्ष्यमनुसृत्य लक्षणप्रवृत्तिः
अलुक्कचित क्वचित्समासेकृतेनकृतेपिविभक्तेरलुक्भव
ति कृच्छ्रान्मुक्तः स्तोकान्मुक्तः अप्सुयोनिरस्येति अप्सुयोनिः
उरसिलोमा हृदिस्पृक् कण्ठेकालः वाचोयुक्तिः दिशोदण्डः
पश्यतोहरइत्यादि नहितेसमानाधिकरणे शाकपार्थिवादी
नाममध्यपदलोपोवक्तव्यः शाकप्रियःशाकपार्थिवः देवपूज
कोब्राह्मणः देवब्राह्मणः देवानांप्रिय इतिषष्ठ्येवनिपात्यते॥

आविद्यद्वंद्वे द्वन्द्वसमासे सति आदिपदस्य ऋविलोपः स्यात् च
सा॰ कारादिकल्पिकवित् माताच पिताच तौ पितरौ श्वश्रूश्वशु
५७ रश्च श्वशुरौ इति नाच्च पुत्राश्च तौ पुत्रौ अना द्वंद्वे द्वंद्वे पूर्वपदस्या
54 कारो वक्तव्यः माताच पिताच तौ मातापितरौ द्वन्द्वे सर्वादित्वान्न
वा सी वर्णाश्रमेतरे वर्णाश्रमेतराः वैयधिकरण्ये बहुव्रीहौ म
ध्यपदलोपश्च भिन्नार्थे निष्ठुत्वं भिन्नविभक्तिकत्वे वैयधिकरण्ये
गं यथा चैः गं यादि प्रत्ययो भवति उपमानाच्च उपमानात् गं
धशाह्यात् इ प्रत्ययो भवति कुमुदस्य गंध इव गंधो यस्य स कु
मुदगंधिः हंसस्य गमनं इव गमनं यस्याः सा हंसगमना दि ५८
क्ते क्षि संज्ञायां दिक्संख्ये संज्ञायां विषये परपद

तस्यार्थौ समसे ते समासः तस्य ह्रस्वः स्यात् अविग्रहो नित्यसमासः
अस्वपदविग्रहो वा इति एवं त्रिः समासाः इति समासप्रक्रि
या अथ तद्धितो निरूप्यते अपत्यम् नाम्नोपत्ये अण् प्रत्ययो भव
ति उपगोरपत्यमिति वाक्ये उपगोरण् इति स्थिते समासप्रत्ययो
रिति षष्ठीलोपः णकारो वृद्ध्यर्थः आदिस्वरस्य ञ्णिति वृद्धिः स्वरा
णां मध्ये य आदिस्वरस्तस्य वृद्धिर्भवति ञिति णिति च तद्धितप्रत्यये पर
तः उकारस्यौकारो वृद्धिः वा व्यञ्जने उकारस्यौकारस्य च अव् भवति
स्वरे यकारे च परे औपगवः वासिष्ठः गौतमस्यापत्यं गौतमः भारद्वा
जः विदादिभ्यश्चेति अण् अनवतरत्वं भौवः वैदः ह्रस्वस्यापत्यं कार्ष्णः
अत इञ् अतः अकारस्य इः स्यात् अपत्ये कश्चित् सांकेत

मातृष्वस्राः षण्णांमातॄणामपत्यं षाण्मातुरः द्वैमातुरः अतइञ्नृभ्यः
श्रा अकारांतान्नाम्नोनृषिशब्दादपत्यैर्थेइञ्प्रत्ययःस्यात नकारो वृद्ध्यर्थः
५५ यस्यलोपः देवदत्तस्यापत्यं देवदत्तिः श्रौधरिः दाशरथिः पुरन्दर
55 स्यापत्यं पौरंदरिः बाह्वादेश्चेञ् वक्तव्यः बाहोरपत्यंबाहविः उ
पबाहोरपत्यंऔपबाहविः औपचाकविः औपबिन्दविः एयायनणो
यणौयायनणौगर्गनडाश्विविशेषितस्त्रीत्वादेः गर्गादेः नडादेः अश्वादेश्च स्त्री
लिङ्गात् पितृष्वस्रादेश्च एय आयण्ण यञ् आयण ईय इत्येतेप्रत्ययाः
स्युः अपत्येर्थे गर्गस्यापत्यं गार्ग्यः वत्सस्यापत्यं वात्स्यः नडस्याप
त्यं नाडायनः नारायणः अलुक् क्वचित् अमुष्यापत्यं आमुष्या ५५
यणः अत्रेरपत्यं आत्रेयः निधेरपत्यं नैधेयः कपेरपत्यं कापेयः

विधेरपत्यं वैधेयः गङ्गाया अपत्यं गाङ्गेयः मह्या अपत्यं माहेयः
पितृष्वसुरपत्यं पैतृष्वस्रीयः मातुः स्वसा मातृष्वसा मातृष्वसुरप
त्यं मातृष्वस्रीयः मातृपितृभ्यां डामहच् मातृपितृभ्यां डामहच् प्रत्य
यः स्यात् मातुः पिता मातामहः पितुः पितामहः क्वचित्स्त्रीलि
ङ्गेऽपि भूमेरपत्यं भौमः लुग्बहुत्वे क्वचित् अपत्यार्थेऽञन्तस्य
प्रत्ययस्य बहुत्वे सति क्वचिद् ऋषिविषये लुग्भवति वसिष्ठस्यापत्या
नि वसिष्ठाः गर्गाः वत्साः अत्रेरपत्यानि अत्रयः विदेहस्यापत्या
नि विदेहाः लुकि न तन्निमित्ते देवतेदमर्थे देवतार्थे इदमर्थे चा
णाः प्रत्ययाः स्युः इन्द्रो देवतायस्येति ऐन्द्रं हविः सोमो देवतायस्ये
ति सौम्यं देवतार्थं इदं वस्त्रं दैवतं क्वचिट्ठ्योः क्वचिन्नवौ तरपत्ययोः

सा० इयोर्वृद्धिः स्यात् अग्निमारुतेकर्म सुहृदोभावः सौहार्दं सौभाग्यं

५८ सुभगायाभावेरकिण स्वधातुरपत्यं सौधातकिः व्यासस्यापत्यं वैया

56 सकिः स्विलोवा उक्तः प्रत्ययाविषयात्तरेणितौवास्तुः अज्ञो

गोर्ग्यस्यासै अनुस्मशिवः तस्येदं धनुराजगवं अनुगावंवा उप

मानाश्च उपमानात्स्वरोगन्त्यशाखः तस्मादिकारप्रत्ययोभवति

कुमुदस्यगंध एव गंधो यस्यासौ कुमुदगंधिः तस्यापत्यं कौमु

दिकौमुदगंध्या स्वश्रुराण्यः श्वशुरस्यायं श्वाशुर्योथवामः वि

सौविदं वैसवं गोपवनोपत्यंत गोपवनात् पथमस्य पाप्हस्य य

त्मस्यः स्यात् गोविदं गव्यम् ऊर्णेभवं कूल्यं नदीयं महीयं ५८

चतुरश्च लौकेयौ चतुरप्राहाघ्येयरत्यनोपत्ययौलः तुर्यः

नदीयः चतुरशब्दस्य वकारस्य लोपश्च अन्यस्य दुक् अन्यशब्दस्य
दुगागमः स्यात् छीयप्रत्यये परे अन्यस्येदं अन्यदीयं अर्धंतरस्याः
दे अर्धंतरतीयम् इतिणिप्रत्ययस्यानुवर्तनार्थम् इतिणयो भवा
हातिणान्ताः पश्चाद्भवाः पाश्चात्याः पुरोभवः पौरस्त्यः कारका
क्रियायुक्ते कारकादित्येते प्रत्ययाः स्युः क्रियायुक्ते कर्तरि कर्म
णि वा णिपठे कुंकुमेन रक्तं कौंकुमं मथुरायाः आगतः मा
थुरः ग्रामे भवः ग्राम्यः पुरं वहति पौरः पौरीयः कंबलेनाहृ
तो रथः कांबलः वहेणाहृतो दध्यः वाल्हः कैनेयकः कईन
इय इक ईन इत्येते प्रत्ययाः स्युः भवार्थे विनेवेद्यो वैकल्पिके क
र्णाटे भवः कार्णाटकः कर्णाटको वा ग्रामादागतः ग्रामीणो

सा
५१
57

वा ग्रामीणः सध्र्यङ्भवः सध्रीचीनः समीचीनः तिर्यङ्भवः
तिरश्चीनः पत्नेणस्त्र क्वचिद्डण्यणायकारलोपो वा भवतीति क
र्ण्यांभवः कानीनः पुष्येणानहडेणपुंक्तापौर्णमासी पुष्ये
भवः पौषी प्रत्ययकार्येईनाणवकव्यः पौषीपणः नृणोऽर्थ म
नुष्यस्येयं मानुषी अगस्त्यस्येयं आगस्त्यीदिक् सूर्यस्येयंसौरीः
श्योषा तडादिभ्याहृदृहाः ईयप्रत्ययो भवति तडीयः ताड्गः ग्राण
सकान्नातः सक्किपः सकोदेवनायस्मात्विता सक्किपर्हविः
इदमस्येदं इंद्रियं इदस्यात्मनोधर्मे ज्ञानकारणं इंद्रियं प्रहैदेव
ति प्राह्निकः शाह्नात वेतिशाह्निकाः वेदेभवः वैदिकाः ता
त्विकः त्यतनौ किमादेरव्ययादेर्भावार्थे स्यतनेत्यलः कुत्रभवः

कुत्रत्यः कुतःभवः कुतस्त्यः तत्रभवः तत्रत्यः यत्रत्यः अद्यभवः
अद्यतनः ह्योभवः ह्यस्तनः श्वस्तनः श्वःभवः सदाभवः सदा
तनः सनातनः पुराभवः पुरातनः चिरंभवः चिरंतनः सायं
भवः सायंतनः स्वार्थेपि उक्ताः प्रत्ययाः स्वार्थेपि भवन्ति देवदत्त
एव देवदत्तः चत्वारो वर्णा एव चातुर्वर्ण्यं चोर एव चौरः चत्वार
एवाश्रमाश्चातुराश्रम्यं त्रय एव लोकाः त्रैलोक्यं षडृतवाराशिरिवि
राटिः स्वश्लोभवार्थे षड्डवः षड्डत्नः षारिभवः षारित्वः विर
त्नः अव्ययात्स्वार्थेनामाकेव प्राकृतेः अव्ययात्स्वार्थेनाव्यये प्राक
प्रकच प्रत्ययो भवति उच्चकैः नीचकैः मयकात्वयका अशीन
तेष्वपश्चात्स्मैरात्वकादिः अशीनात्प्रत्यययोः परयोः शुष्म

सा
५८
58

स्मदोः तवकममकावित्यादेशौ भवतः तवायं तावकं ममेदं मा
मकं तावकीनः मामकीनः एकत्वे तवकममकौ द्वित्वे बहुत्वे
युष्माकास्माकौ यौष्माकः आस्माकः यौष्माकीनः आस्माकी
नः वतस्तुल्यसादृश्येर्थे वत् प्रत्ययो भवति चैत्रेण तुल्यं मैत्रः
चैत्रवन्मैत्रः घटेन तुल्यं घटवत् पटेन तुल्यं पटवत् भावे त्वतल्प्र
णः शब्दप्रवृत्तिनिमित्तं भावस्तस्मिन्भावे त्वतल्प्रत्ययाः इमे ते प्रत्यया
भवंति ब्राह्मणस्य भावो ब्राह्मणता तांतस्य नित्यं स्त्रीलिङ्गत्वात्
पु समाहारे तावैगुण्यस्य त्वपाणि समाहारहितानि नानां समा
हे जनता ब्राह्मणस्य भावो ब्राह्मणत्वं त्वे तो नपुंसके ब्राह्मण्यं ५८
सुमनसो भावः सौमनस्यं सुभगस्य भावः सौभाग्यं विदुषो

भावो वैदुष्यं कर्मण्यपि ष्यञ् एवकार्थः ब्राह्मणस्य कर्म भावो वा
ब्राह्मण्यं गणेऽस्मिन् कर्मणास्य राजन्यं नोर्विति टेर्लोपः अपि शब्दा
त्साध्वर्थोऽदेयः कर्मणि साधुः कर्मण्यः पारणे साधुः पारण्यः
सभायां साधुः सभ्यः लोहितादि[illegible]मन् लोहितादेर्भावे इमन्
प्रत्ययो भवति स च डित् डित्वात् टेर्लोपः लोहितस्य भावो लोहि
मा अन्येभ्यो भावः अणिमा मह्यो भावो महिमा कालस्य भावः कालि
मा लघोर्भावो लघिमा पक्षे लघुता लाघवं उरस इमनि उरका
रस्य रेफः स्यात् इमनि परे पृथोः भावः प्रथिमा म्रदिमा इद्दिमा क्र
शिमा भ्रशिमा गुरोर्गरिमन् इति गुरोर्भावो गरिमा बहोर्लोपो भूच
बहोः परेषामिमनादीनामिकारस्य लोपः स्यात् बहोर्भूयस्यानेभ्य

आदेशः भस्मा अस्त्यर्थे मतुः नाम्नोऽस्त्यर्थे मतुप्रत्ययः स्यात् अ
आ स्यास्मिन्वास्तीत्यर्थे उकारो नुंविधानार्थः व्रतो नुम अन्त्यस्य सा
५९ वित्ति दीर्घः गावो विद्यतेऽस्यास्मिन्वा गोमान् श्रीर्विद्यतेऽस्यास्मिन्वा
59 श्रीमान् आयुर्विद्यतेऽस्यास्मिन्वा आयुष्मान् गोमती आयुष्म
ती अःकौ मत्वर्थे नाम्नो मत्वर्थे अःकौ स्तः वैजयंती पताका वि
द्यते यस्य सः वैजयंतः वैजयंतिकः माया विद्यते यस्य सः मायि
कः मान्तोपधात्वतिनौ मकारान्तात् मकारोपधात् अकारान्ता
त् अकारोपधात् वतिनौ प्रत्ययौ स्तः अस्त्यर्थे भानिन तत्राणि
विद्यते यस्यासौ भवान् चेद्रमः धनमस्यास्ति धनवान् पुत्रवा ५९
न् पुत्री छत्री वणवान् दण्डी दण्डो विद्यतेऽस्यासौ दण्डी भूमिः

किमस्यास्ति किंवान् कामवान् कामी शामोविद्यतेयस्यसः शा
मवान् शामीलक्ष्मीवान् तडिदादिभ्यश्च तडिदादिभ्यः शब्देभ्यः
वत् प्रत्ययोभवति चकारान्तडिदादेरत्र चपस्यजत्वंनास्ति
तडिद्विद्यतेस्यास्मिन् वा तडित्वान् विद्युत्वान् मरुत्वान् एतत्किं
तस्य: परिमाणेवतेघवदेशा यत्तदेतशब्देभ्यो डेरावंपरिमाणेन
कियान् प्राग्येतदोवा एतड्डावंतस्मात् विकल्पेनवैकोपरे
यस्मिन् पक्षे श्रानभवति तत्रकृत्तस्यरकारादेशः स्यात् एत
न्यमाणं एतावान् एतत्परिमाणं इयान् तुन्दादेरिलः तुन्दि
लः उदरिलः फेनिलः दंतादुरः उन्नतादंतायस्यासौदंतुरः श्र
द्धादेरालुः श्रद्धालुः दयालुः निद्रालुः कृपालुः कृपादिभ्योव

लः कृषीरस्यास्तीति कृषीवलः नैषोविद्यतेयस्यासौतपस्वी मायावी
ग्रा॰ ८ मेधावी स्रग्वी वाचोग्मिन् सहुवाक् विद्यते यस्यासः वाग्मी वाचा
60 देरालः धारालः दंष्ट्रालः शिखालः आलाटौ कुत्सितभाषिणि
वाचालः वाचाटः ईषदपरिसमाप्तौकल्पदेश्यदेशीयाः ईषदपरि
समाप्तः सर्वज्ञः सर्वज्ञकल्पः पटुदेश्यः पटुदेशीयः कविदेश्यः
कविदेशीयः कुत्सायांपाशप् कुत्सितोवैयाकरणः वैयाकरण
पाशः प्रशंसायांरूपप् प्रशस्तोवैयाकरणः वैयाकरणरूपः भू
तपूर्वेचरट् पूर्वंदृष्टः दृष्टचरः स्त्रीदृष्टचरी प्राग्वर्यविकारेभ्यश्च
न्यादिभ्यमयट् अन्नंप्राग्वर्यस्यासौ अन्नमयोयज्ञः मन्नमयोव
टः स्त्रीमयोजाल्मः अपूपमयोचरुः तदधीनेवद्देवेन्यश्चाचेण ८

वक्तव्यः व्याकरणं वेद अधीते वा वैयाकरणः शोभनो अश्वः स्व
श्वः ते वेदेति सौवश्वः न य्वाभ्यां पूर्वौ तु ऐच् संयोगौ यौ वा तयोर्यकारव
कारयोः संबन्धिनः स्वरस्य वृद्धिर्न स्यात् किंतु तयोः पूर्वं आगमो भवति
ऐच्च औच्च ऐचौ तौ आगमौ स्तः वर्णविश्लेषं कृत्वा यकारात्पूर्वं ऐ
कारः वकारात्पूर्वं औकारः पश्चादादिस्वरस्य वृद्धिः इत्यभि
नार्थे लक्षणानां तायस्यातिसलक्षितः लक्षितः तरतमयोर्विभागः प्र
कर्षे प्रकर्षे अतिशये अर्थे तरतमईयसु इष्ठ इमनिस प्रत्ययाः स्युः अति
शयेन शुक्लः शुक्लतरः शुक्लतमः इयसिष्ठेष्वितावितिवतोर्लो
डित्वाट्टेर्लोपः उकारोनुबन्धार्थः वतोर्नु न स्यात् तेनो दीर्घः
अतिशयेन लघुः लघीयान् पापीयान् लघीयसी पापीयसी

ष्ठिष्ठः प्रापिष्ठः गुर्वादेरिष्ठेमनीयःसु गरादेशः स्यात् टिलोप

सा। ९८ श्च न भवति अतिशयेन गुरुः गरिष्ठः गरीयान् गरीयसी गरिमा

युवाल्पयोः कन् च यविष्ठः यवीयान् कनिष्ठः कनीयान् अल्पि

61 ष्ठः अल्पीयान् प्रियस्य प्रादेशः अतिशयेन प्रियः प्रेष्ठः प्रेयान्

प्रेमा स्थूलस्य स्थवादेशः अतिशयेन स्थूलः स्थविष्ठः स्थ

वीयान् ईलोपोज्याशाश्चादीयसः ज्यादेशादुत्तरस्य यसः ईकार

लोपः स्यात् अतिशयेन वृद्धः ज्यायान् ज्येष्ठः अतिशयेन दीर्घः

द्राघीयान् द्राघिष्ठः अतिशयेन प्रशस्यः श्रेष्ठः श्रेयान् श्रेय

सी बहोरुत रस्य च हस्य इकारोऽपि भवति ईयसः ईकारस्य च लो ९८

पः भूच बहोः अतिशयेन बहुः भूयिष्ठः भूयान् किमेत्याद्य

द्वाभ्यामाद्यन्तरतमयोराम् वक्तव्यः अतिशायने किं किंतरां किंतमा
कुतस्तरां परमाणवः कुतस्तमां तेषामारम्भकत्वे उच्चैस्तरां गाय
ति अतिशायने पचति पचतितरां पचतितमां इत्यादि परिमाणे
दघ्नादयः परिमाणेऽर्थे दघ्नच् द्वयसच् मात्रच् इत्येते प्रत्ययाः स्युः
जानुः परिमाणमस्येति जानुदघ्नं जलं शिरोद्वयसं पुरुषमात्रं ॥
योर्विद्वानोरेकस्य निर्धारणे किमादिभ्यो डतरडतमौ प्रत्ययौ वक्त
व्यौ डकारष्टिलोपार्थः कतरो भवतोः कविः कतमो भवतां लो
किकः भवतोर्यतरस्तार्किकः ततरस्तद्दृष्टमान संख्याया विधा
धावधारणे संख्यानं येषां ते संख्येयास्तस्य विशेषावधारणं तस्मि
न्नर्थे वर्त्तमानात् प्रत्ययो भवति द्विविधा शास्त्रानीयः इयं से

सा० ६२
62

ख्यापूरकः द्वितीयः त्रेः सम्प्रसारणं त्रयाणां संख्यापूरकः तृती-
यः षट् चतुरोस्थः थुकं च षष्ठः चतुर्थः कतिकतिपयाभ्यां थुक्
कतिथः कतिपयथः पञ्चादेर्मट् पञ्चमः सप्तमः विंशत्यादे-
स्तमट् विंशतितमः विंशतितमी विंशत्यादेस्तेर्विकल्पलोपः
विंशः त्रिंशः शतादेर्नित्यम् शततमः शततमी एकादशादे-
र्डः एकशब्दस्याकारः एकादशः द्वादशः त्रयोदशः अष्टा-
दशः प्राक् शतान्नवतेः द्वाचत्वारिंशदादेर्वा द्वाचत्वारिंशत्
द्विचत्वारिंशत् अनशीतेरिति विशेषणात् द्व्यशीतिः त्र्यशीतिः
शतात्प्राक् षण्णवतिः अनशीतिः अष्टाशीतिः संख्यायाः ६२
प्रकारे धा द्वाभ्यां प्रकाराभ्यां द्विधा त्रिधा चतुर्धा गणोऽगणवधा

प्रत्ययान्तस्य ग्रहणः अग्रे प्रत्ययश्च स्मात् चकारो विकल्पार्थः द्वेधा
द्वैधं त्रेधा त्रैधं क्रियाया आवृत्तौ कृत्वसुच् पञ्चकृत्वः द्वित्रिभ्यां
सः द्विकृत्वे त्रिकृत्वे बह्वाद्येः शस् बहुशः स्तोकशः तयपौ सं
वा ख्यायाँ अविनः शाक्षात्पायदेश प्रत्ययो भवतः द्वितयं त्रितयं द्वयं त्र
यं स्त्रीचेत् द्वयी त्रयी द्वितयी त्रितयी जङ्घाशाब्दात् निजवर्णेला
दयो वक्तव्याः अतिशयेन जङ्घयोर्विग्रहस्य स्मृतः जङ्घालः जङ्घा
कारिकः कारिकप्रत्ययः जाङ्घिकः स्कण्णप्रत्ययः मूलेऽपश
मी कुटीशुण्डाभ्यां रः अल्पा शमी शमीरः अल्पा कुटी कुटीरः
शुण्डारः स्त्रीभ्यो ढः नाण स्वं भैः स्त्रेणं पौंस्नं शेषान्निपात्याः क

स्याद्व्यः कांस्याख्यामयस्येति कृतिः ॥ इति तद्धितप्रक्रिया इति सारस्व-
ती प्रक्रिया प्रथमवृत्तिः समाप्तः ॥ अथाख्यातप्रक्रिया निरूप्यते